केन्द्रीय-संस्कृत-विश्वविद्यालयः / Central Sanskrit University
मुक्तस्वाध्यायपीठम् / Mukta Swadhyaya Peetham
(Institute of Open and Distance Education )
56-57, Institutional Area, Janakpuri, New Delhi-110058
Website: www.sanskrit.nic.in/msp/

**Advt. No. 01/2022-2023** **Date: 29/11/2022**

**साक्षात्कारः / INTERVIEW for engaging Contract / Guest-Faculty/Academic Associates for MSP**

**संविदाधारित-समेकित-वैतनिकानां सहायकाचार्याणाम्/ अतिथि-सहायकाचार्याणां/भाषाशिक्षकाणां/शैक्षिकसहयोगिनां च नियोजनाय साक्षात्कारः**

केन्द्रीय-संस्कृत-विश्वविद्यालयेन मुक्तस्वाध्यायपीठनिमित्तं संविदाधारित-समेकित-वैतनिकानां सहायकाचार्याणाम् / अतिथि-सहायकाचार्याणां/भाषाशिक्षकाणां/शैक्षिकसहयोगिनां च नियोजनाय साक्षात्कारः आयोजयिष्यते । आसक्ताः अर्हाः अभ्यर्थिनः आवेदयेयुः/साक्षात्कारे भागं गृह्णीयुः। विवरणम् अधोनिर्दिष्टमस्ति –

Central Sanskrit University, Delhi (CSU) will hold **ONLINE-INTERVIEW** for engagement of **Assistant-Professors on Contract / Guest Faculties (subject-wise)/Language teachers/Academic Associates** for undertaking academic/teaching activities related to ODL & Online programmes offered by Mukta Swadhyaya Peetham. Interested eligible candidates may apply online. Details are given below -

| अपेक्षिताः (Required positions) | विषयः (Subjects) | अपेक्षितानां संख्या (No. of required positions) |
|---|---|---|
| सहायकाचार्यः (संविदा.) | व्याकरणम् (प्रक्रिया) | 01 |
| | व्याकरणम् (अर्थः) (सूत्र-भाष्य-व्याख्यान-टीकादिपरम्परा) | 01 |
| | व्याकरणम् (शाब्दबोधाध्ययनम्) | 01 |
| | व्याकरणम् (भाषाप्रयोगविज्ञानम्) (प्रयोगशुद्धिविवेकः, भाषाप्रयोगवैशद्यम्, भाषासौष्ठवम्, आशयसंक्षेपविस्तारौ, शैलीपरिष्कारः, अनुवादः) | 01 |
| | ज्यौतिषम् - (गणितम्) | 01 |
| | ज्यौतिषम् (वास्तुशास्त्रम्) | 01 |
| | ज्यौतिषम् (खगोलविज्ञानम्) | 01 |
| | साहित्यम् (काव्यम्) | 01 |
| | साहित्यम् (लक्षणग्रन्थाः) | 01 |

| | | |
|---|---|---|
| | वेदान्तः (श्रुतिप्रस्थानम्) | 01 |
| | वेदान्तः (सूत्रप्रस्थानम्) | 01 |
| | न्यायः (न्याय-वैशेषिकदर्शने) | 01 |
| | साङ्ख्यम्/योगः/ सर्वदर्शनम् | 01 |
| | संस्कृतपत्रकारिता (मुद्रणमाध्यमः/दृश्य-श्रव्यमाध्यमः) | 01 |
| | **Total** | **14** |
| **सहायकाचार्यः (अतिथिः)** | व्याकरणम् (भाषाविज्ञानम्/Linguistics) | 01 |
| | ज्यौतिषम् (फलविमर्शः) | 01 |
| | साहित्यम् (अभिनवसाहित्यम्/सङ्गीतम्) | 01 |
| | वेदान्तः (स्मृतिप्रस्थानम्) | 01 |
| | मीमांसा | 01 |
| | **Total** | **05** |
| **भाषा-शिक्षकः (संविदा.)** | संस्कृतभाषाशिक्षणम् (सरलमानकम्) | 01 |
| | **Total** | **01** |
| **शैक्षिक-सहयोगी (संविदा.)** | शैक्षिकसहयोगी (प्रबन्धः) | 01 |
| | शैक्षिकसहयोगी (पाठ्यक्रमः) | 01 |
| | **Total** | **02** |
| | **Grand Total** | **22** |

- अभ्यर्थी अन्तर्जालमाध्यमेन (online) आवेदनपत्रपूरणावसरे अर्हतानुसारेण यस्मिन् यस्मिन् विषये साक्षात्कारमिच्छति तत्तद्विषयान् चिह्नितान् कुर्यात्। पृथक् पृथक् आवेदनपूरणस्य आवश्यकता नास्ति। विश्वविद्यालयः अभ्यर्थिनः योग्यतां परीक्ष्य आवश्यकतानुसारेण समुचिते शास्त्रे / विषयसमूहे क्वचिदपि नियोजयितुमर्हति।

  Candidates are advised to put tick-marks against the post-related subjects/shastras for which they want to appear in the interview. Option is available for applying for multiple posts/positions in single online-application form. No need of seperate application for each subject.

- **आवेदयितुम् जालपटलसूत्रम्** (Link to apply online) - https://csu.co.in/msp_eng/
- **अवेदयितुम् अन्तिमदिनाङ्कः** (Last date to apply) - 09-12-2022
- **अर्हता-कार्यस्वरूपादिविषयकं विवरणं सावधानेन पठनीयम्।**

  Read detailed information regarding eligibility criteria, nature of duty etc. carefully.

## संविदाधारेण समेकितवैतनिकानां सहायकाचार्याणां / अतिथिप्राध्यापकानां/ भाषाशिक्षकाणां/शैक्षिकसहयोगिनां नियोजनसम्बद्धनियमाः

### I. पारिश्रमिकम्/वेतनम्

a. सहायकाचार्यः (संविदा.) – रू. 57,700/= + HRA + special hard station DA (10%) प्रतिमासम् + यथानियमं वार्षिकमनुदानम् (सकृद् गृहयात्रायाः रेल-यात्राचीटिकाव्ययः+5000 रूप्यकात्मक-स्वास्थ्यबीमासहयोगराशिः) ।

b. सहायकाचार्यः (अतिथिः) – रू. 50,000/= (मुक्तस्वाध्यायपीठस्य/दूरस्थशिक्षाप्रणाल्याः कार्यस्वरूपानुसारेण अन्यूनं 50 बोधनसम्बद्धकालांशानां, निर्दिष्टानां सम्बद्धशैक्षिककार्याणां च निर्वहणम् उपलक्ष्य प्रतिमासं समेकितराशिः) ।

c. प्रशिक्षित-भाषाशिक्षकः (संविदा.) - रू. 50,000/= समेकितं प्रतिमासम् ।

d. शैक्षिकसहयोगी - रू. 40,000/= समेकितं प्रतिमासम् ।

### II. अर्हता

A. **शास्त्रेषु सहायकाचार्य-पदनिमित्तम्**

- **अनिवार्यार्हता** - विश्वविद्यालय-अनुदान-आयोगेन सहायकाचार्यपदाय निर्दिष्टा अर्हता यथा –
  - सम्बद्धशास्त्रे (सम्बद्धविषये वा) आचार्य/ एम्.ए. (संस्कृतम्) / तत्समकक्ष-परीक्षायाम् अन्यूनं 55% अङ्कैः (तत्सम-स्तरस्य श्रेण्याम् वा) उत्तीर्णता ।
  - UGC/CSIR-संस्थया आयोजितायां राष्ट्रिय-पात्रतापरीक्षायाम् (NET) उत्तीर्णता **अथवा** वि.वि.अनु.आयोगेन तत्तत्काले प्रकाशितनियमानुसारेण संस्कृते/सम्बद्धशास्त्रे प्राप्त-शोधोपाधिः (यदुपलक्ष्य वि.अनु.आयोगेन राष्ट्रिय-पात्रता-परीक्षायाः अनिवार्यता परिहृता) ।
  - येषां शोधकार्यं सम्पन्नप्रायम्/शोधप्रबन्धः समर्पितः, परीक्षणमवशिष्टं - ते अपि साक्षात्कारे भागं ग्रहीतुमर्हन्ति। योग्यतानुसारेण तादृशानां चयनं करिष्यते चेत् शोधोपाधिप्रमाणपत्रप्रस्तुतये कश्चन कालावकाशः दीयेत ।)
  - संस्कृतमाध्यमेन सरलशैल्या शास्त्रीयविषयाणां बोधनस्य/लेखनस्य/विषयप्रस्तुतेः च क्षमता अनिवार्या। (साक्षात्कारावसरे क्षमता प्रतिपादनीया)
- **अभीप्सिता अतिरिक्तार्हता** (Desirable) – सङ्गणकस्य उपयोगे व्यावहारिकज्ञानम्। सङ्गणकमुपयुज्य ई-स्वाध्यायसामग्रीनिर्माणकुशलेभ्यः आद्यता दीयेत ।

B. **संस्कृतपत्रकारिता/ माध्यमविषयकस्य अध्यापकपद-निमित्तम्**

- **अनिवार्यार्हता** -
  - संस्कृते स्नातकोत्तरपदवी
  - उच्चारणसौष्ठवम्, विषयाभिव्यक्तिकौशलम्, सङ्गणकमुपयुज्य भाषाध्ययनस्य स्वाध्यायसामग्रीनिर्माणस्य, संस्कृतमाध्यमेन बोधनस्य, लेखनस्य विषयप्रस्तुतेः च क्षमता अनिवार्या (साक्षात्कारावसरे क्षमता प्रतिपादनीया) ।

| | |
|---|---|
| | • UGC/CSIR-संस्थया आयोजितायां राष्ट्रिय-पात्रतापरीक्षायाम् (NET)/SLET-परीक्षायां वा उत्तीर्णता **अथवा** वि.वि.अनु.आयोगेन तत्तत्काले प्रकाशितनियमानुसारेण संस्कृते/सम्बद्धशास्त्रे प्राप्त-शोधोपाधिः (यदुपलक्ष्य वि.अनु.आयोगेन राष्ट्रिय-पात्रता-परीक्षायाः अनिवार्यता परिहृता) ।<br>• येषां शोधकार्यं सम्पन्नप्रायम्/शोधप्रबन्धः समर्पितः, परीक्षणमवशिष्टं - ते अपि साक्षात्कारे भागं ग्रहीतुमर्हन्ति। योग्यतानुसारेण, कौशलं पुरस्कृत्य तादृशानां चयनं करिष्यते चेत् शोधोपाधिप्रमाणपत्रप्रस्तुतये कश्चन कालावकाशः दीयेत ।)<br>➢ **अभीप्सिता अतिरिक्तार्हता** (Desirable)– सङ्गणके दृश्य/श्रव्य-प्रस्तुतीनां सम्पादनस्य प्राथमिकं ज्ञानम्, स्वाध्यायप्रबन्धनतंत्रांशविषये परिकल्पना, पत्रकारितायाम्/पत्रिकासु/विविधवृत्तमाध्यमेषु विषयप्रस्तुतेः वार्ताप्रतिवेदनादीनां वा अनुभवः । |
| | C. **प्रशिक्षित-भाषाशिक्षकः (सरलमानकसंस्कृतम्) इति पदनिमित्तम्**<br>➢ **अनिवार्यार्हता** –<br>• संस्कृते स्नातकपदवी / तत्समकक्ष-परीक्षायाम् अन्यूनं 55% अङ्कैः (तत्सम-स्तरस्य श्रेण्याम् वा) उत्तीर्णता ।<br>• शिक्षाशास्त्री-इत्युपाधिः/के.सं.विश्वविद्यालयस्य अनौपचारिकसंस्कृतशिक्षणविभागेन अन्य-प्रतिष्ठितसंस्थया वा अयोजित-शिक्षकप्रशिक्षणवर्गे प्रशिक्षणम् ।<br>• सङ्गणकमुपयुज्य भाषाध्ययननिमित्तक-**स्वाध्यायसामग्रीनिर्माणस्य** क्षमता, प्रस्तुतिकौशलम्, संस्कृतमाध्यमेन सरलशैल्या भाषाबोधनस्य क्षमता / संस्कृतभाषाशिक्षणस्य / संस्कृतसम्भाषणशिबिरचालनस्य/ अनौपचारिकसंस्कृतशिक्षणकेन्द्रे अध्यापनस्य अनुभवः (साक्षात्कारावसरे क्षमता प्रतिपादनीया) ।<br>➢ **अभीप्सिता अतिरिक्तार्हता** (Desirable)– स्वाध्यायप्रबन्धनतंत्रांशविषये परिकल्पना, सङ्गणके दृश्य/श्रव्य-प्रस्तुतीनां सम्पादनस्य प्राथमिकं ज्ञानम् । |
| | D. **शैक्षिकसहयोगि- पदनिमित्तम्**<br>➢ **अनिवार्यार्हता** - संस्कृते स्नातकोत्तरपदवी, सङ्गणकमुपयुज्य भाषाध्ययनाय स्वाध्यायसामग्रीनिर्माणस्य, संस्कृतमाध्यमेन बोधनस्य च क्षमता (साक्षात्कारावसरे क्षमता प्रतिपादनीया) ।<br>➢ **अभीप्सिता अतिरिक्तार्हता** (Desirable)–<br>• सङ्गणकस्य उपयोगे व्यावहारिकज्ञानम्, शास्त्रीयविषयान् सरलशैल्या बोधयितुं, लेखितुं, प्रस्तोतुं च क्षमता ।<br>• स्वाध्यायप्रबन्धनतंत्रांशविषये परिकल्पना, सङ्गणके दृश्य/श्रव्य-प्रस्तुतीनां सम्पादनस्य प्राथमिकं ज्ञानम् । |
| III. | **नियोजनस्य अवधिः -**<br>प्राथमिकरूपेण एकादश-मासान् यावत् । कार्यक्षमतायाः आवश्यकतायाः च आधारेण अनन्तरवर्षेषु अनुवर्तनं, प्रक्रियानुसारेण पुनर्नियुक्तिः वा भवितुम् अर्हति । |

IV. **कार्यस्वरूपम् -**

मुक्तस्वाध्यायपीठे नियुक्तानाम् अध्यापकानां/शैक्षिकसदस्यानां मुख्यं कर्तव्यं भवति - दूरस्थशिक्षाप्रणाल्या अध्यापनम् / सम्बद्धशैक्षिककार्याणि/सांस्थिककार्याणि च । तत्र अधोनिर्दिष्टकार्याणि अन्तर्भवन्ति –

- निर्दिष्टविषयस्य/शास्त्रस्य सम्बद्धपठ्यस्य स्वरूपनिर्धारणम्, पाठ्यक्रमविकासः, पाठसंरचना (Unit-structure)-परिकल्पनम्, पठ्यांशविस्तारपूर्वकं स्वाध्यायसामग्रीनिर्माणम् ।
- सम्बद्धविषयक-नूतनपाठलेखनम्, पूर्वतः विद्यमानस्वाध्यायसामग्रीणां संशोधनम्/ सम्पादनम्/ परिवर्धनम्/ परिष्करणम्/ परिवर्तनम् ।
- स्वाध्यायसहयोगक्रियाकलापाः, स्वाध्यायपरामर्शः/पर्यायकक्ष्याः/आन्तर्जालिक-साक्षात्-कक्ष्याः, दूरस्थशिक्षा-बोधनप्रणालीविकासः, बोधनपद्धतिपरिष्कारः/सम्बद्धम् अनुसन्धानम्/शोधकार्यम् ।
- बोधटिप्पणीनिर्माणम्, स्वाध्यायसम्प्रेरणम्, विषयाधिग्रहणाय युक्तिबोधनम्, स्वाध्यायनिर्वहणतन्त्रांशस्य सदुपयोगपुरस्सरं बोधनम् । पाठानां चतुरायामात्मिका प्रस्तुतिः ।
- स्वाध्यायमूल्याङ्कनम्, प्रदत्तकार्यनिर्माणम्, निर्दिष्टाध्येतृगणानाम् अध्ययनपर्यवेक्षणं, तदनु मार्गदर्शनम् ।
- अधिकृतैः काले काले प्रदीयमानानि सम्बद्धानि, अतिरिक्तानि वा शैक्षिककार्याणि/सांस्थिककार्याणि ।
  - एवं च नियुक्तः जनः निर्दिष्टशास्त्रस्य / निर्दिष्टविषयस्य/ निर्दिष्टपठ्यानाम् अधिकृतः अध्यापकः/संयोजकः/शैक्षिकसदस्यः भवति ।

➢ मुक्तस्वाध्यायपीठे नियुक्ताः अध्यापकाः/शैक्षिकसदस्याः/सहयोगिनः संस्कृतशिक्षणोपयोगिन्याः दूरस्थसिक्षाप्रणाल्याः विकासाय, विद्यमानपाठ्यक्रमसंवर्धनाय, अभिनवपाठ्यक्रमनिर्माणाय, अध्येतृगणसंवर्धनाय प्रयासरताः अनुसन्धानतत्पराश्च भवेयुः ।

V. **सामान्यनिर्देशाः –**

a. आवेदनाय अन्तर्जालसङ्केतः (Link to apply online) - [https://csu.co.in/msp_eng/](https://csu.co.in/msp_eng/)

b. आवेदनाय अन्तिमदिनाङ्कः - 09-12-2022

c. साक्षात्कारस्य सोपानद्वयं भविष्यति। प्रथमसोपानस्य साक्षात्कारः अन्तर्जालमाध्यमेन (online) भविष्यति। आवेदनपत्रपरिशीलनानन्तरं चिताः अभ्यर्थिनः प्रथमसोपानस्य साक्षात्काराय आहूयन्ते । ततः चिताः द्वितीयसोपानस्य साक्षात्कारार्थम् आहूयन्ते । द्वितीयसोपानस्य साक्षात्कारे प्रत्यक्षम् उपस्थितिः आवश्यकी ।

d. आवेदनस्य स्थितिविषये सूचना, प्रथमसोपानस्य साक्षात्कारे भागग्रहणाय आहूतानां सूची, आन्तर्जालिक-साक्षात्कारस्य सूत्रं (Link for online interview) सम्बद्धसूचनादिकं च विश्वविद्यालयस्य जालपुटे ([http://www.sanskrit.nic.in/msp/](http://www.sanskrit.nic.in/msp/) ) Notification इत्यत्र यथाकालं प्रकाशयिष्यते। अभ्यर्थिनः एतद्विषये सावधानाः भवेयुः।

e. द्वितीयसोपानस्य साक्षात्काराय स्थानं समयश्च सम्बद्धेभ्यः यथासमयं सूचयिष्यते ।

f. विज्ञापितानां पदानां पूरणे अपूरणे च विश्वविद्यालयस्य अधिकारः अस्ति ।

g. साक्षात्कारे समुपस्थितानां कौशलानि विश्वविद्यालयस्य आवश्यकतां च उपलक्ष्य विज्ञापने उल्लिखितपदानां संख्यां न्यूनीकर्तुं

वर्धयितुं च विश्वविद्यालयः अधिकृतोऽस्ति ।

h. साक्षात्कारे समुपस्थितानां विशिष्टकौशलानि अभिलक्ष्य विश्वविद्यालयस्य आवश्यकतां च उपलक्ष्य अपेक्षानुसारेण अभ्यर्थिना आवेदितपदमतिरिच्य पदान्तरनिमित्तम् अभ्यर्थिनामुपस्थापनं /चयनं कर्तुं विश्वविद्यालयः चिन्तयितुमर्हति ।

i. प्रौद्योगिक्याः/तन्त्रांशस्य लोपकारणतः, विलम्बेनोपस्थितेः कारणतः, अन्तर्जालसम्पर्कस्य शैथिल्यकारणेन आकस्मिक-कारणान्तरेण वा अभ्यर्थी साक्षात्कारे भागं ग्रहीतुं न प्रभवति चेत् तदर्थं विश्वविद्यालयः उत्तरदायी न भविष्यति ।

j. नियोजनप्रक्रियायां विवादे सति केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतेः निर्णयः अन्तिमः मान्यश्च भविष्यति ।

k. नियुक्तेन जनेन प्राधान्येन मुक्तस्वाध्यायपीठस्य शैक्षिकविकासकेन्द्रे (के.सं. विश्वविद्यालयस्य राजीवगान्धीपरिसरे शृङ्गेर्यां) कार्यं कर्तव्यं भविष्यति । विश्वविद्यालयस्य अपेक्षानुसारेण यदा कदापि यथानिर्देशं विश्वविद्यालयस्य/मुक्तस्वाध्यायपीठस्य अन्यस्मिन् कस्मिंश्चित् केन्द्रे अपि कर्तव्यं निर्वोढव्यं भवितुमर्हति ।

l. नियुक्त्यवधेः परिसमाप्तौ/ शैक्षिकसत्रस्य समाप्तौ स्वतः नियुक्तिः निरस्येत । कार्यक्षमतायाः आधारेण, मुक्तस्वाध्यायपीठस्य आवश्यकताधारेण, अधिकृतनिर्णयाधारेण च नियुक्तेः अनुवर्तनस्य, पुनर्नियुक्तेः वा सम्भावना वर्तते । विषयेऽस्मिन् विश्वविद्यालयस्य निर्णयः एव अन्तिमः।

m. निर्धारितावधौ पूर्णसमयस्य कार्यनिमित्तं कृता अनुबन्धाधारिता (संविदाधारिता)-नियुक्तिरियम् अस्थायिनी भवति । एतदाधारेण स्थिरतायै, वरीयतासूच्यां स्थानाय वा आग्रहः न कर्तव्यः । विशेषपरिस्थितौ, कारणमदत्वा अपि नियुक्तेरनुबन्धम् कदाचिदपि निरस्तीकर्तुं विश्वविद्यालयस्य अधिकारोऽस्ति ।

n. **विरामः/अवकाशः** – विश्वविद्यालयस्य/ मुक्तस्वाध्यायपीठस्य नियमानुसारेण अवकाशस्य प्रावधानं भविष्यति ।

**-निदेशकः (मु.स्वा.पी.)**

**Terms and conditions for the Contract/Guest Faculty/Academic Associates to be engaged on contract basis for MSP in CSU**

I. **Remuneration -**

a. Assistant Professor (Contract) – Rs. 57,700/= + HRA + special hard station DA (10%) p.m.

b. Assistant Professor (Guest) Rs. 50,000/- fixed per month. (Minimum of 50 lectures/lessons/teaching or academic-sessions in terms of ODL/OL per month and other duties assigned by the Director).

c. Bhasha-shikshak (contract) - Rs. 50,000/-

d. Academic Associate (Contract) - Rs. 40,000/- p.m.

II. **Prescribed qualification**

**A. For Assistant Professors for *Shastric*-subjects for MSP in CSU**

➢ **Essential** - Minimum criteria as per UGC Regulations for the appointment for the post of Assistant Professors such as –

- Acharya/M.A.(Sanskrit) or equivalent degree in the concerned/allied/relevant discipline, with atleast 55% marks (or an equivalent grade in point scale wherever the grading system is followed) from recognized University.
- Pass in National Eligibility Test (NET) in the concerned/allied/relevant discipline, conducted by the UGC or the CSIR, or who are or have been awarded a Ph.D. Degree in accordance with the University Grants Commission (Minimum Standards and Procedure for Award of M.Phil./Ph.D. Degree) Regulations, 2009 or 2016 and their amendments from time to time as the case may be exempted from NET.
- Those who are about to complete/submitted thesis/waiting for PhD-viva or certificate may also apply for interview. If such candidates are selected based on required skills & knowledge, will be given limited period to submit the PhD certificate.
- Ability of teaching, writing, presenting/elaborating/summarizing Shastric topics in free & lucid style through Sanskrit medium.

➢ **Desirable –** Working knowledge of Computer. Preference will be given to those who are able to prepare Self learning Materials using electronic media.

**B. For Assistant Professor in Sanskrit Journalism & Media** for MSP in CSU

➢ **Essential** -

- Post-graduation in Sanskrit or equivalent degree with atleast 55% marks (or an equivalent grade in point scale wherever the grading system is followed) from recognized University.
- Pass in National Eligibility Test (NET) in the concerned/allied/relevant discipline, conducted by the UGC or the CSIR, or who are or have been awarded a Ph.D. Degree in accordance with the University Grants Commission (Minimum Standards and Procedure for Award of M.Phil./Ph.D. Degree) Regulations, 2009 or 2016 and their amendments from time to time as the case may be exempted from NET.
- Those who are about to complete/submitted thesis/waiting for Ph.D-viva or certificate may also apply for interview. If such candidates are selected based on required skills & knowledge, will be given limited period to submit the PhD certificate.

| | |
|---|---|
| | • Pronunciation-clarity, good communication-skills in Sanskrit with sound base of practical-grammar, skills in writing, presenting/elaborating/summarizing various kinds of topics in free & lucid style through **Sanskrit medium**, ability to teach in Sanskrit medium (These abilities are to be proved during the interview).<br>➢ **Desirable –** Working knowledge of Computer. Basic knowledge/idea of editing audio/video-presentations, ability to prepare Self Learning Materials using electronic media, experience of reporting news in print/multi-media. |
| | **C. For Sanskrit Language teacher (Sarala Manaka Samskrutam)**<br>➢ **Essential** -<br>• Graduation in Sanskrit or equivalent degree with at least 55% marks (or an equivalent grade in point scale wherever the grading system isfollowed) from recognized University.<br>• Shiksha-shastri/NFSE-Teachers' Training conducted by Central Sanskrit University or similar training/*shikshaka-prashikshana-varga* conducted by reputed Sanskrit organization.<br>• Ability to prepare Self Learning Materials using electronic media, ability to teach Sanskrit language in Sanskrit medium / experience of teaching Sanskrit in Sambhashana-shibiras/NFSE Centres of CSU (These abilities are to be proved during the interview).<br>➢ **Desirable –** Experience/basic idea of utilizing LMS for teaching, Basic knowledge/idea of editing audio/video-presentations, experience of reporting news in print/multi-media. |
| | D. **For engaging Academic** Associates<br>➢ **Essential** -<br>• Post-graduation in Sanskrit or equivalent degree with at least 55% marks (or an equivalent grade in point scale wherever the grading system isfollowed) from recognized University.<br>• Ability to prepare Self Learning Materials using electronic media, presentation skills, ability to teach Shastra/concerned subject in Sanskrit medium (These abilities are to be proved during the interview).<br>➢ **Desirable –** Experience/basic idea of utilizing LMS for teaching, Basic knowledge / idea of editing audio/video-presentations. |
| III. | **Period of engagement** –<br>Initially, the engagement under this offer will be for a period of 11 months from the date of appointment in Central Sanskrit University. The appointment may likely to be continued further on the appraisal/performance of the candidate subject to the requirement/decision of CSU. |
| IV. | **Nature of duty of a teacher in MSP (D.E.)**<br>**a.** Nature of duty of a teacher in MSP (D.E.) is teaching in terms of D.E/ ODL/OLE system. This may involve one or more of the following activities –<br>• Online teaching, course design and curriculum development, preparing SLMs (print-media, electronic-media & online-media) of one particular assigned subject/programme/discipline. |

| | |
|---|---|
| | • Self-learning-support-activities, counseling / study-guidance / teaching through ODL/OL techniques, teaching in contact/virtual/online classes, imparting subject-knowledge, developing knowledge-transmission-techniques/methods.<br>• Preparing teaching comments/giving learning tips to the learners (either on paper/via email / direct oral/ telephonically/electronically through LMS).<br>• Evaluation of self-learning-process, preparing assignments, monitoring progress of self-learning of the learners of concerned course/subject.<br>• Writing lessons, editing/modifying/improving/revising (including convening these works) of SLMs on concerned/assigned subject.<br>• Any other relevant academic/institutional works assigned by the concerned authority.<br>Thus he/she will be in-charge-teacher/coordinator of particular subject/course/paper or Programme (as the case may be).<br>**b.** Teachers/Academic associates in MSP should be engaged in developing ODL/OL methodologies & learning materials relevant to Sanskrit-education & will have to associate in developing new, innovative and interdisciplinary courses for various target groups. |
| V. | **General Instructions -**<br>a. Link to apply online - https://csu.co.in/msp_eng/<br>b. Last date to apply online – 09-12-2022<br>c. There will be two steps of interview. First step will be online-interview. Scrutinized candidates will be called for the first step online-interview. Selected candidates through online interview only will be called for second step of interview for which physical attendance is necessary.<br>d. Candidates are advised to visit CSU website regularly regarding interview and other updates. List of scrutinized candidates & date-Schedule for online-interview will be notified in the CSU's website ( http://www.sanskrit.nic.in/msp/ ) under the head ' Notification'.<br>e. Details of 2nd step interview will be notified to the candidates selected for 2nd step interview at appropriate time.<br>f. The University reserves the right whether to fill the positions as per advertisement or not.<br>g. No. of required positions may be increased or decreased by the university (CSU) based on the need of the CSU, available expertise/skills of the candidates, and/or as per the decision of the CSU.<br>h. If considerable special qualities of candidates are observed during the interview, CSU may consider for offering other suitable task subject to the requirement of CSU.<br>i. In case any candidate fails to appear for interview due to any technical reason/internet problems/late arrival or any incidental cause, the University shall not be responsible for that.<br>j. In case of any controversy in selection process, the decision of Hon'ble Vice Chancellor, CSU shall be final. |

| | |
|---|---|
| | k. The selected persons will be deployed at Academic Development Centre of Muktasvadhyaya Peetham situated at CSU, R.G. Campus, Sringeri, Karnataka. However, the engaged persons may have to go for work in any Centre of the MSP/CSU if such directions given by the authorities of MSP/CSU any time as per the requirement.<br>l. Engagement of the selected Contract/Guest/ Faculty or Academic Associate shall automatically expire at the end of the period of engagement / end of academic session as it would be mentioned in the appointment letter. The appointment may likely to be continued or re-engagement may be done following due process based on the appraisal/performance of the candidate subject to the requirement of the University. The decision of the University (CSU) will be final in this regarding.<br>m. This engagement is made purely on temporary and fulltime-contract basis for fixed period. No claim can be done for regularization/confirmation/seniority on the basis of this engagement. Under special circumstances, University (CSU) may terminate the engagement any time even before thestipulated time, without assigning any reason.<br>n. **Leave** – Provision for leave will be there as per the norms of University/MSP. |

**-Director (MSP)**